॥ वाल्मीकि रामायण॥

७ उत्तरकाण्ड

अध्याय ७९

तां कथामिलसम्बद्धां रामेण समुदीरिताम् ।
लक्ष्मणो भरतश्चैव श्रुत्वा परमविस्मितौ ॥१॥

तौ रामं प्राञ्जलीभूत्वा तस्य राज्ञो महात्मनः ।
विस्तरं तस्य भावस्य तदा पप्रच्छतुः पुनः ॥२॥

कथं स राजा स्त्रीभूतो वर्तयामास दुर्गतिम् ।
पुरुषो वा यदा भूतः कां वृत्तिं वर्तयत्यसौ ॥३॥

तयोस्तद्भाषितं श्रुत्वा कौतूहलसमन्वितम् ।
कथयामास काकुत्स्थस्तस्य राज्ञो यथा गतम् ॥४॥

तमेव प्रथमं मासं स्त्रीभूत्वा लोकसुन्दरी ।
ताभिः परिवृता स्त्रीभिर्येऽस्य पूर्वं पदानुगाः ॥५॥

तत्काननं विगाह्याशु विजह्रे लोकसुन्दरी ।
द्रुमगुल्मलताकीर्णं पङ्क्तयां पद्मदलेक्षणा ॥६॥

वाहनानि च सर्वाणि सन्त्यक्त्वा वै समन्ततः ।
पर्वताभोगविवरे तस्मिन्नेमे इला तदा ॥७॥

अथ तस्मिन्वनोद्देशे पर्वतस्याविदूरतः ।
सरः सुरुचिरप्रख्यं नानापक्षिगणायुतम् ॥८॥

ददर्श सा इला तस्मिन्बुधं सोमसुतं तदा ।
ज्वलन्तं स्वेन वपुषा पूर्णं सोममिवोदितम् ॥९॥

तपन्तं च तपस्तीव्रमम्भोमध्ये दुरासदम् ।
यशक्सरं कामगमं तारुण्ये पर्यवस्थितम् ॥१०॥

सा तं जलाशयं सर्वं क्षोभयामास विस्मिता ।
सह तैः पूर पुरुषैः स्त्रीभूतै रघुनन्दन ॥११॥

बुधस्तु तां निरीक्ष्यैव कामबाणाभिपीडितः ।
नोपलेभे तदात्मानं चचाल च तदाम्भसि ॥१२॥

इलां निरीक्षमाणः स त्रैलोक्याभ्यधिकां शुभाम् ।
चिन्तां समभ्यतिक्रामत्का न्वियं देवताधिका ॥१३॥

न देवीषु न नागीषु नासुरीष्वप्सरःसु च ।
दृष्टपूर्वा मया का चिद्रूपेणैतेन शोभिता ॥१४॥

सदृशीयं मम भवेद्यदि नान्यपरिग्रहा ।
इति बुद्धिं समास्थाय जलात्स्थलमुपागमत् ॥१५॥

स आश्रमं समुपागम्य चतस्रः प्रमदास्ततः ।
शब्दापयत धर्मात्मा ताश्चैनं च ववन्दिरे ॥१६॥

स ताः पप्रच्छ धर्मात्म कस्यैषा लोकसुन्दरी ।
किमर्थमागता चेह सत्यमाख्यात माचिरम् ॥१७॥

शुभं तु तस्य तद्वाक्यं मधुरं मधुराक्षरम् ।
श्रुत्वा तु ताः स्त्रियः सर्वा ऊचुर्मधुरया गिरा ॥१८॥

अस्माकमेषा सुश्रोणी प्रभुत्वे वर्तते सदा ।
अपतिः काननान्तेषु सहास्माभिरटत्यसौ ॥१९॥

तद्वाक्यमव्यक्तपदं तासां स्त्रीणां निशम्य तु ।
विद्यामावर्तनीं पुण्यामावर्तयत स द्विजः ॥२०॥

सोऽर्थं विदित्वा निखिलं तस्य राज्ञो यथागतम् ।
सर्वा एव स्त्रियस्ताश्च बभाषे मुनिपुङ्गवः ॥२१॥

अत्र किं पुरुषा भद्रा अवसञ्शैलरोधसि ।
वत्स्यथास्मिन्गिरौ यूयमवकाशो विधीयताम् ॥२२॥

मूलपुत्रफलैः सर्वा वर्तयिष्यथ नित्यदा ।
स्त्रियः किम्पुरुषान्नाम भर्तॄन्समुपलप्स्यथ ॥२३॥

ताः श्रुत्वा सोमपुत्रस्य वाचं किम्पुरुषीकृताः ।
उपासां चक्रिरे शैलं बह्वयस्ता बहुधा तदा ॥२४॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com